करेणुसुतः, पुं, (करेणुशास्त्रकरणाय उत्पन्नः सुतः ।) मुनिविशेषः । इति त्रिकाण्डशेषः ॥ (करेणोः सुतः । इति व्युत्पत्त्या करभः ॥)

करेणूः, पुं स्त्री, (कृ + एनूः ।) हस्ती । हस्तिनी । इत्यमरटीकायां रायमुकुटः ॥

करेन्दुकः, पुं, (करेण रश्मिना दीप्त्या इति यावत् इन्दुरिव कायति शोभते । कै + कः ।) भूतृणम् । इति राजनिर्घण्टः ॥ (भूतृणशब्देऽस्य गुणादयो ज्ञेयाः ॥)

करेवरः, पुं, (कीर्य्यते क्षिप्यते माषाद्यः कपिभिरिति यावत् करः तस्मिन् व्रियते उत्पद्यते ।) तुरुष्कः । इति राजनिर्घण्टः ॥ शिलारस इति भाषा ॥

करोटं, क्ली, (कं वायुं अन्तर्वायुम् । रोटते प्रतिहन्ति के मस्तके रोटते दीप्यते वा । रुट् + अच् ।) शिरोऽस्थि । इति भरतो द्विरूपकोषश्च ॥

करोटिः, स्त्री, (केन वायुना अन्तर्वायुना रुट्यते प्रतिहन्यते । के शिरसि रोटते दीप्यते शोभते वा । रुट् + इन् ।) शिरोऽस्थि । इत्यमरः । २ । ६ । ६९ ॥ मातार खुलि इति भाषा ॥

करोटी, स्त्री, (करोट + गौरादित्वात् ङीष् ।) शिरोऽस्थि । इति भरतो द्विरूपकोषश्च ॥

कर्क, हासे । सौत्रधातुरयम् । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट् ।) कर्कशः । इति दुर्गादासः ॥

कर्कः, पुं, (करोति आदिष्टं पालयति "कृदाधारार्चिकलिभ्यः कः" । उणां ३ । ४० । इति कः । बहुलवचनान्न ककारस्येत् संज्ञा ।) शुक्लाश्वः । इत्यमरः । २ । ८ । ४६ ॥ कुलीरः । दर्पणः । (क्रियतेऽसौ) घटः । कर्कटराशिः । (कृणोति हिनस्ति) अग्निः । इतिहेमचन्द्रः शब्दरत्नावली च ॥ कर्कटवृक्षः । इति राजनिर्घण्टः ॥

कर्कचिर्भिटी, स्त्री, (कर्कवत् कर्करूपा चिर्भिटी वा । कर्कवर्णा वा चिर्भिटी ।)चिर्भिटा । कर्कटीभेदः । इति राजनिर्घण्टः ॥

कर्कटः, पुं, (कर्क + अटन् प्रत्ययः ।) वृक्षविशेषः । तत्पर्य्यायः । कर्कः २ क्षुद्रधात्री ३ क्षुद्रामलकसंज्ञः ४ कर्कफलम् ५ ॥ * ॥ जलजन्तुविशेषः । काँकड़ा इति भाषा । तत्पर्य्यायः । कर्कटकः २ कुलीरः ३ कुलीरकः ४ सदंशकः ५ पङ्कवासः ६ तिर्य्यग्गामी ७ । (यथाह आर्य्यासप्तशती । ३२२ । "अयमुद्गृहीतवड़िशः कर्कट इव मर्कटः पुरतः" ॥) अस्य गुणाः । सृष्टविण्मूत्रत्वम् । भग्नसन्धानत्वम् । वायुपित्तनाशित्वञ्च । कृष्णकर्कटगुणाः । बलकारित्वम् । ईषदुष्णत्वम् । अनिलापहत्वञ्च । इति राजनिर्घण्टः ॥ * ॥ पक्षिविशेषः । इति मेदिनी करकटिया इति भाषा ॥ पद्मकन्दः । तुम्बी । इति जटाधरः ॥ * ॥ मेषादिद्वादशराश्यन्तर्गतचतुर्थराशिः । स तु पुनर्व्वसुशेषपादेन सह पुष्याश्लेषाभ्यां भवति । अस्य देवता कुलीराकृतिः । स तु पृष्ठोदयः । श्वेतवर्णः । कफप्रकृतिः । स्निग्धः । जलचरः । विप्रवर्णः । उत्तरदिक्स्वामी । बहुस्त्रीसङ्गः । बहुसन्तानश्च । अत्र जातस्य फलम् । कपटमनस्त्वं मृदुभाषित्वं मन्त्रित्वं अप्रवासित्वं अस्थिरत्वञ्च । इति ज्योतिषम् ॥ * ॥ जन्मकालीनचन्द्राश्रितैतद्राशिफलम् ।

"अतुलकलामलनिर्म्मलवृत्तयः
सुहृदगन्धजलाश्रयकेलयः ।
किल नरास्तु कुलीरगते विधौ
वसुमतः सुमतोऽर्थिलब्धयः" ॥

इति कोष्ठीप्रदीपः ॥ * ॥ तस्योदये तन्नामकलग्नं भवति । तस्य गणितप्राप्तपरिमाणं यथा । दशयवकुलाधिकपञ्चाङ्गुलप्रभे कलिकाताख्यदेशे वर्त्तमानेनविंशायनांशे चत्वारिंशदधिकपञ्चदण्डाः । इति ज्योतिषम् ॥ तत्र जातफलम् ।

"कर्किलग्ने समुत्पन्नो भोगी सर्व्वजनप्रियः ॥
मिष्टान्नपानभोगी च जायते स्वजनप्रियः" ॥

इति कोष्ठीप्रदीपः ॥ (नागविशेषः । यथा पुराणम् । "अनन्तो वासुकिः पद्मो महापद्मस्तु तक्षकः । कुलीरः कर्कटः शङ्खस्त्वष्टौ नागाः प्रकीर्त्तिताः" ॥)

कर्कटकः, पुं, (कर्कट एव स्वार्थे कन् ।) कुलीरः ॥ इत्यमरः । १ । १० । २१ ॥ (यथाह सुश्रुतः । "कृष्णाकर्कटकास्तेषां बल्याः कोष्णोऽनिलापहाः । शुक्लाः सन्धानकृत् सृष्ट-विण्मूत्रोऽनिलपित्तहा" ॥)

कर्कटशृङ्गिका, स्त्री, (कर्कटतुल्यं शृङ्गं अस्याः कर्कटशृङ्गेव स्वार्थे कन् ततष्टापि इत्वम् ।) कर्कटशृङ्गीवृक्षः । इति शब्दरत्नावली ॥ ("नीलोत्पलं मृणालञ्च यष्टी कर्कटशृङ्गिका । गोक्षीरैश्च द्वितीये च पीत्वा शाम्यति वेदना" ॥ इति इन्द्रजाले गर्भस्रावचिकित्सा ॥)

कर्कटशृङ्गी, स्त्री, (कर्कटस्य शृङ्गमिव दंशकमिवेत्यर्थः शृङ्गमग्रभागो यस्याः ।) वृक्षविशेषः । काँकड़ाशिङ्गी इति भाषा । तत्पर्य्यायः । कर्कटाख्या २ महाघोषा ३ शृङ्गी ४ कुलीरशृङ्गी ५ चक्राङ्गी ६ कुलिङ्गी ७ कासनाशिनी ८ । इति रत्नमाला ॥ घोषा ९ वनमूर्द्धजा १० वक्रा ११ शिखरी १२ कर्कटाङ्गा १३ कर्कटी १४ विषाणिका १५ कोलीरा १६ चन्द्रास्पदा १७ बलाङ्गा १८ । अस्या गुणाः । तिक्तत्वम् । गुरुत्वम् । उष्णत्वम् । वायुहिक्कातिसारकासश्वासपित्तास्रनाशित्वञ्च । इति राजनिर्घण्टः ॥

कर्कटाख्या, स्त्री (कर्कटस्याख्येव आख्याऽस्याः ।) कर्कटशृङ्गीवृक्षः । इति रत्नमाला ॥

कर्कटाहः, पुं, (कर्कटं आह्वयते स्पर्द्धते कण्टकमयत्वात् । आ + ह्वे + कः । कर्कट इति नाम्ना आह्वयते वा ।) बिल्ववृक्षः । इति राजनिर्घण्टः ॥

कर्कटाह्वा, स्त्री, (कर्कटाह्व + टाप् ।) कर्कटशृङ्गीवृक्षः । इति वैद्यकम् ॥

कर्कटिः स्त्री, (करं कटति प्राप्नोति । कटः + "सर्व्वधातुभ्य इन्" । उणां ४ । ११७ । इति इन् । ककं परिणामे शुक्लतां अटति गच्छति वा कर्क + अट् + इन् । शकन्ध्वादिवत् अलोपे साधुः ।) कर्कटी । इति शब्दरत्नावली । काँकुड़ इति भाषा ॥

कर्कटिनी, स्त्री, (कर्कटाकारः अस्त्यस्याः । कर्कट + इन् ततो ङीप् ।) दारुहरिद्रा । इति राजनिर्घण्टः ॥

कर्कटी, स्त्री, (कर्कं कण्टकं अटति गच्छति । कर्क + अट् + इन् । शकन्ध्वादित्वात् साधुः ततो ङीष् । करं कटति वा कटेः इन् ततो ङीष् ।) शाल्मलिफलम् । इति मेदिनी ॥ सर्पः । इति शब्दरत्नावली ॥ देवदालीलता । कर्कटशृङ्गीवृक्षः । एर्व्वारुः । बड़ काँकुड़ इति भाषा । घोटिकावृक्षः । फललताविशेषः । काँकुड़ इति भाषा ॥ तत्पर्य्यायः । कटुदली २ कर्द्दीपनिका ३ पीनसा ४ मूत्रफला ५ त्रपुषा ६ हस्तिपर्णी ७ लोमशकाण्डा ८ मूत्रला ९ बहुकन्दा १० । इति राजनिर्घण्टः ॥ कर्कटाह्वः ११ शान्तनुः १२ । इति रत्नमाला ॥ चिर्भटी १३ वालुकी १४ एर्व्वारुः १५ त्रपुषी १६ । इति हेमचन्द्रः ॥ अस्या गुणाः । मधुरत्वम् । शीतलत्वम् । तिक्तायास्तु रक्तपित्तनाशित्वम् । कफदोषकारित्वञ्च । पक्वायास्तु मूत्ररोधार्त्तिनाशित्वम् । इति राजनिर्घण्टः ॥ (तथा च भावप्रकाशे । "कर्कटी शीतला रूक्षा ग्राहिणी मधुरा गुरुः । बल्या पित्तहरा सामा पक्वा तृष्णाग्निपित्तकृत्" । अस्याः पाकप्रकारस्तु । "त्वग्वीजरहिता प्रौढ़ा गुलिकाकारखण्डिता । तलिता सुघृते तप्ते कर्कटी वाष्पलेहिता ॥

विपाकखण्डं घृतदुग्धसार्द्धं
विभावितं वह्निजशर्कराभ्याम् ।
कृतैलवासञ्च कटुत्वमेतत्
प्रतिहृत्य रोचनमातनोति ॥)

कर्कटुः, पुं, (कर्क निपातनात् साधुः । कर्कट + मृगय्वादित्वात् कुः वा ।) करेटुपक्षी । इति शब्दरत्नावली ॥ करकटिया इति भाषा ॥

कर्कन्धुः, पुं स्त्री, (कर्कं कण्टकं दधातीति । धा + निपातनात् कुः नुम् च ।) कोलिवृक्षः । इत्यमरटीकायां स्वामी ॥ (बदरीफलम् । अस्य पर्य्यायगुणा यथा, भावप्रकाशस्य पूर्व्वखण्डे १मभागे ॥ "पुंसि स्त्रियाञ्च कर्कन्धुर्बदरी कोलमित्यपि । फेनिलं कुवलं घोंटा सौवीरं बदरं महत् । अजप्रिया कुहा कोली विषमोभयकण्टका" ॥ तत्र बदरविशेषाणां लक्षणानि गुणाश्च । "पच्यमानं सुमधुरं सौवीरं बदरं महत् । सौवीरं बदरं शीतं भेदनं गुरुशीतलम् ॥ वृंहणं पित्तदाहास्रक्षयतृष्णानिवारणम् । सौवीरं लघु सम्पक्वं मधुरं कोलमुच्यते ॥ कोलन्तु बदरं ग्राहि रुच्यमुष्णञ्च वातलम् । कफपित्तकरञ्चापि गुरु सारकमीरितम् ॥ कर्कन्धुः क्षुद्रबदरं कथितं पूर्व्वसूरिभिः । अम्लं स्यात् क्षुद्रबदरं कषायं मधुरं मनाक् ॥ स्निग्धं गुरु च तिक्तञ्च वातपित्तापहं स्मृतम् । शुष्कं भेद्यग्निकृत्सर्व्वं लघुतृष्णाक्लमास्रजित्" । क्वचित् क्लीबेऽपि दृश्यते यथा, "कर्कन्धुकोलबदरमामं पित्तकफावहम् । पक्वं पित्तानिलहरं स्निग्धं समधुरं सरम् ॥ पुरातनं तृट्शमनं श्रमघ्नं दीपनं लघु । सौवीरं बदरं स्निग्धं मधुरं वातपित्तजित्" ॥ इति सुश्रुते सूत्रस्थाने । ४६ अध्याये ॥)